# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - आचार्य-१, सेमेस्टर-१** | **प्रश्नपत्रम् - २** | **गुणाः - ७०** |
| **विषयः - पुराणेतिहासः** | **कोड - CC-4.1.1** | **समयः - ०३-०६** |
| **दिनाङ्कः - ६.१२.२०१६** | **ग्रन्थः - महाभारत-शान्तिपर्व १ तः ५० अध्यायाः** | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ कस्याप्येकस्य ससन्दर्भं विवेचनं विधीयताम् ।** **०४**

*(१) पञ्चैव हि सुता देवि भविष्यन्ति तव ध्रुवाः ।*
*सार्जुना वा हते कर्णे सकर्णा वा हतेऽर्जुनः ॥*

*(२) चतुष्पदां गौः प्रवरा लोहानां काञ्चनं वरम् ।*
*शब्दानां प्रवरो मन्त्रो ब्राह्मणो द्विपदां वरः ॥*

**प्रश्नः २** *(१) युधिष्ठिरस्य वानप्रस्थाश्रमविचारान् शान्तिपर्व आश्रित्य वर्णयन्तु ।* **१२**

*अथवा*

*(२) अर्जुनोक्त गृहस्थधर्मविचारान् यथाग्रन्थं वर्णयत ।*

**प्रश्नः ३ द्वयोः उत्तरे दीयेताम् ।** **०४**

*(१)पक्षिरूपं धृत्वा कः कान् प्रतिवदति ?*

*(२) ''नास्ति सिद्धिरकर्मणः'' इत्यस्य कः भावः ?*

*(३) कर्णः केन शप्तः ? कस्मात् ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ४ कस्याप्येकस्य सन्दर्भसहितं विवेचनं विधीयताम् ।** **०४**

*(१) दण्डश्चेन्नभवेल्लोके विनश्येपुरिमाः प्रजाः ।*
*जले मत्स्यानिवाभक्ष्यन् दुर्बलान् बलवत्तराः ॥*

*(२) तत्त्वज्ञो जनको राजा लोकेऽस्मिन्निति गीयते ।*
*सोऽप्यासीन्मोहसम्पन्नो मा मोहवशमन्वगाः ॥*

**प्रश्नः ५** *(१) शङ्खलिखतकथाविवेचनं विधीयताम् ।* **०८**

*अथवा*

*(२) ह्यग्रीवचरितं यथाग्रन्थं लिखत ।*

**प्रश्नः ६ त्रयाणामतिलघूत्तराणि दीयन्ताम् ।** **०३**

*(१) युधिष्ठिरः कस्मात् धर्मराजः प्रोक्तः ?*

*(२) को नाम सदेहोऽपि विदेहः प्रोक्तः ?*

*(३) ''कृपणा फलहेतवः'' इत्यस्य कः तत्पर्यार्थः ?*

*(४) देवस्थानः क आसीत् ?*

*(५) अर्जुनः कस्मात् गुडाकेशः प्रोक्तः ?*

## तृतीयान्वितिः ( युनिट – ३ )

**प्रश्नः ७** **कस्याप्येकस्य ससन्दर्भं विवेचनं विधीयताम् ।** **०४**

*(१)* *अनर्हते यद् ददाति न ददाति यदर्हते ।*
*अर्हानर्हापरिज्ञानाद् दानधर्मोऽपि दुष्करः ॥*

*(२)* *यत्र सूर्य उदेति स्म यत्र च प्रतितिष्ठति ।*
*सर्वं तद् यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥*

**प्रश्नः ८** *(१) मान्धातुः कथां सविस्तरं लिखत ।* **०८**

*अथवा*

*(२) नारद–पर्वताख्यानं सविस्तरं लिखत ।*

**प्रश्नः ९** **त्रयाणामतिलघूत्तराणि लिख्यन्ताम् ।** **०३**

*(१) सुवर्णष्ठीवी कः अवर्तत ?*
*(२) 'मान्धाता' इति नाम कस्माज्जातम् ?*
*(३) ''यमौ'' इति कयोः संज्ञा ?*
*(४) को गाङ्गेयः प्रोक्तः ?*
*(५) को वृकोदरः प्रोक्तः ?*

## चतुर्थान्वितिः ( युनिट – ४ )

**प्रश्नः १०** **कस्याप्येकस्य ससन्दर्भं विवेचनं कुरुत ।** **०४**

*(१)* *यथा दीपो निवातस्थो निरिङ्गो ज्वलने पुनः ।*
*तथासि भगवन् देव ! पाषाण इव निश्चलः ॥*

*(२)* *अहो रामस्य वार्ष्णेय शक्रस्येव महात्मनः ॥*
*विक्रमो वसुधा येन क्रोधान्निःक्षत्रिया कृता ॥*

**प्रश्नः ११** *(१) श्रीकृष्णकृतं भीष्मगुणवर्णनं यथाग्रन्थं वर्णयत ।* **१२**

*अथवा*

*(२) भीष्मकृतं श्रीकृष्णमहिमवर्णनं विधीयताम् ।*

**प्रश्नः १२** **संक्षिप्तं टिप्पणीद्वयं लिखत ।** **०४**

*(१) युधिष्ठिरस्य राज्याभिषेकः ।*
*(२) चार्वाकवधः ।*
*(३) श्रीपरशुरामः ।*

=०=